भोजनमीमांसा

Dr. V.V. Anilkumar

कालदोषचिन्तने स्मृत्यादयः बहुत्र बहुविधानं निर्दिश्यन्ति। स्मृत्यादीनामाचारे प्रामाण्यात् तैः उपदिष्टाः मार्गाः सर्वथा स्वीकरणीयाश्च। प्रायश्चित्तादिनिरूपणावसरे भोज्यवस्तूनां शुद्धिः अशुद्धिः च युक्तियुक्तं विचार्य करणीयामिति निर्देशः च इष्यते। प्रधानतया कालदोषस्य निम्ननिर्दिष्टरीत्या वर्गीकरणं कर्तुं शक्यते। ते च यथा -

१) सन्ध्यासमयदोषः
२) ग्रहणकालदोषः
३) व्रतादिकालदोषः
४) जननमरणादिकालदोषः
५) पर्युषितदोषः
६) शुक्तदोषः
७) धर्मपरकालदोषः इत्येवम् ।

जगतामाश्रयत्वेन विद्यमानस्य कालस्य परिचिन्तनं प्राचीनकालादारभ्य निरूपितं भवति। अतीतादिव्यवहारहेतुः काल इति तर्कसंग्रहे। अखण्डापरिमितस्वरूपस्य कालस्य गुणदोषकल्पना अनुचिता भवति। किन्तु स्मृत्यादिषु औपाधिकत्वेन अपरिमितस्यापि कालस्य परिमितत्वं कल्पयित्वा गुणदोषविचारः कृतो दृश्यते। यस्मिन् काले यत्कर्माचरणेन गुणः संभवति तत्कालः परिगृहीतव्यः दोषकालः त्याज्यश्च। अतः कालस्य धर्माधर्मफलनिर्णये ज्ञानमावश्यकम्।

सन्ध्यासमयदोषः

दिवारात्रिसम्बन्धिदण्डद्वयरूपः कालविशेषः भवति सन्ध्या। 'ध्यै चिन्तने' इति धातोः निष्पन्नोयं शब्दः सम्यक् ध्यानकालविशेषं प्रस्तौति। सन्ध्या तु कालस्य पत्नीत्वेन उल्लिखितमस्ति-

"कालस्य तिस्रो भार्याश्च सन्ध्यारात्रिदिनानि च"[१]

एवं रूपायां सन्ध्यावेलायां, भोजन- जलपान- निद्रा- मैथुनानि तथा वेदस्य विधिवत्समुच्चारणञ्च न कार्याणि। उक्तञ्च यमस्मृतौ -

"चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत्।
आहारं मैथुनं निद्रा स्वाध्यायं च चतुर्थकम्।।"[२]

अत्र सन्ध्यानिरूपणावसरे तत्कालस्य द्विधा निर्धारणं क्रियते। प्रथमतया सान्ध्योपासनारूपकर्मविशेषतया द्वितीयतया भोजनादिनिषिद्धकर्मस्थापनद्वारा च। प्रथमे उपासनाविशेषे सन्ध्या दिनरात्र्योः सन्धौ जातः मुहूर्तः। मुहूर्तं तावत् घटिकाद्वयरूपम्। सूर्योदयात् प्राग् तथा सूर्यास्तमनानन्तरं च विद्यमानः सन्ध्यासमयः उपासनायां प्रथमपरिगणनीयः कालः।

भोजनविषये सन्ध्याकालवर्जनं शास्त्रविहितम्। अस्तमनकाले सूर्यरश्मयः क्षयं यान्ति। अस्तात् त्रिघटिका भवति सायंसन्ध्या। तस्मिन् समये भोजनस्य निषेध एव। प्रागुदयात् अरुणोदयकालादारभ्य उदयात् परं घटिकाचतुष्टयं भक्षणाय निषेधकाल एव। उक्तञ्च ।

"उदयात् प्राक् चतस्रस्तु घटिका अरुणोदयः नाश्नीयात् "।[३]

आयुर्वेदविषयेऽपि सान्ध्यभोजननिषेधो निर्दिष्टः । यथा-

"याममध्ये न भोक्तव्यम् यामद्वयं न लंघयेत् "[४]

सान्ध्यभक्ष्यनिषेधः आबालवृद्धपर्यन्तं निर्दिष्टं भवति। न केवलं भक्षणनिषेधः अपि तु जलपाननिषेध अपि कार्यः। सन्ध्यासमये भोजनम् अशुद्धं भवति। अशुद्धभोजनेन धातूनां वैषम्यसम्भवे विविधरोगसमुत्पादः अनुभवपदमागच्छति। तथा रोगश्च।

ग्रहणकालदोषः

सन्ध्याभोजनवत् ग्रहणकालभोजनमपि निषिद्धं भवति। उक्तञ्च-

"सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना।।"[५]

सार्ववर्णिकनिर्देशः सर्वावस्थानिर्देशश्चायम्। आबालस्थविराणां रोगातुराणां च सर्वथा करणीयमिदम्।

ग्रहणकालभोजननिषेधस्य पौराणिकदृष्टिः तावत् सूर्यसोमादीनां प्रभावादेव भूमण्डलं

संरक्षितमिति। अमृतीकरणः चन्द्रः स्वस्य जीवनपोषकामृतरश्मिभिः भूमण्डलमभिवर्षति तथा उष्णकिरणः सूर्यः तदमृतरसपाकभावेन सर्वान् पोषयति। अत एव सूते सुवति वा अमृतम् सुनोति वा अमृतेन जगत् इति व्युत्पत्त्या सोमशब्दः। जीवनधारणक्रियाकारकत्वेन चन्द्रस्य जैवातक इत्यपि संज्ञा। षू प्रेरणे इति धातोर्निष्पन्नस्सूर्यशब्दः तदमृतपरिपाकप्रेरकत्वेन भाति। भुक्तस्यान्नस्य जठराग्निना यथा पाकः संभवति तद्वत् सोमाभिवृष्टामृतरसस्य सूर्यगभस्तिभिः परिपाकः। तदेवोक्तं वाल्मीकिरामायणे यथा-

"एष देवासुरगणान् लोकान् पाति गभस्तिभिः" [६]

न केवलं मनुष्याणां अपि तु सर्वप्राणिनां संरक्षणभरणपोषणविषये सूर्यस्य महिमा उच्छृङ्गिता भवति।

राहुग्रस्तदिवाकरसोमौ लोकपालने यदा असमर्थौ संजातौ तदा विद्यमानानां पदार्थानां हानिः संभवति। अतः एव हानिकरकिरणैराश्लिष्टानां भक्षणानां त्यागः निर्दिष्टः। न केवलं शरीरस्य अपि तु अन्तरेन्द्रियाणाम् समुपकाराय विधिरियं विहिता इत्यनुसन्धेया।

भोजनविषये चन्द्रग्रहणकाले श्रृतमन्नं विवर्जयेत् इत्येव निर्देशः कुत्रचित् दृश्यते। भोजनसामग्र्याः स्नेहपक्वजलपक्वभेदेन द्विधात्वम्। श्रृतान्नं तावत् जलपक्वमेव। जलसंयुक्तपाककर्मसंजातान्ननिषेधः चन्द्रग्रहणकाले करणीयः, किन्तु सूर्यग्रहणवेलायां नाश्नीयात् इत्यनेन सर्वभक्षणनिषेधश्च निर्दिष्टः। सामान्यतया एव निर्देशोऽयम् , विशिष्टतया बालवृद्धातुराणाम् पक्षे नियमाः प्रत्येकतया उपदिष्टाः ।

व्रतकालदोषः

अन्तरात्मनः शुद्ध्यर्थं धर्मशास्त्रपुराणेतिहासेषु व्रतानि विहितानि। ज्ञानशक्तिविचारशक्तिश्रद्धाबुद्धिभक्तिपवित्रतादिसम्पत्तिः व्रतैः साध्येति मत्वा पापक्षयाय पुण्याभिवृद्धये व्रताचरणं कार्यमिति विधिः। ब्रियते स्वर्गं, व्रजन्ति स्वर्गमनेन वा इत्यादि व्रतशब्दव्युत्पत्तौ स्वर्गफलकामनया व्रतानामाचरणं शास्त्रसम्मतमित्यवगन्तव्यम्। व्रतानां उद्देश्यः चित्तशुद्धिः एव । केषाञ्चित् व्रतसमये भोजननिषेधः केषाञ्चित् एकवारभोजनम् च निर्दिष्टम् । भक्ष्यविषये व्रतानां कृते को विधिरित्यत्र विचार्यते।

पूर्णभक्षणनिषेधावगाहिव्रतानां मध्ये प्रथिताः एकादशी, शिवरात्रि, रामनवमी च सर्वसम्मताः व्रतचतुष्टयमेतत् सर्वेषां कृते नित्यश्च काम्यश्च। उभयतया तत्र भोजननिषेध उक्तः । उपवासेन फलतया स्वर्गप्राप्तिश्च बोधितः। स्थालीपुलाकन्यायेन एकादशीविषये

अत्र विचार्यते। एकादशी उपवासः द्विधा भवति- व्रतरूपा तथा निषेधपरिपालनरूपा। तथा काम्या नित्यरूपा च। निषेधपरिपालन उपवासः काम्यव्रतरूप उपवासश्च शुक्लपक्षे तथा कृष्णपक्षे च करणीयौ। नित्यव्रतोपवासः शुक्लपक्षे एव आचरणीयः यस्मात् पापहानिः गृहस्थस्य भवति ।

उक्तञ्च निर्णयसिन्धौ-

" एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही।।" [७]

कुत्रचित् उपवासस्य स्थाने नक्तव्रतनिर्देशः। अर्थात् रात्रिभोजनं युक्तम्। अनोदनमपि कुत्रचित् सूचितम्। यथा-

"उपवासनिषेधे तु भक्ष्यं किञ्चित् प्रयोजयेत् । नक्तं हाविष्यान्नमनोदनं वा " [८]

जननमरणादिकालदोषः

यज्ञोपवीतयुक्तानां ब्राह्मणक्षत्रियवैश्यानां तथा विवाहितशूद्राणां च मरणे भक्ष्यसामग्रीणामशुद्धिः स्मृतिषु निर्दिष्टा भवति। क्रमशः ब्राह्मणस्य दशदिनपर्यन्तं, क्षत्रियस्य द्वादशदिनपर्यन्तं, वैश्यस्य पञ्चदशदिनपर्यन्तं तथा मासमेकं शूद्राणां च अशुद्धिः भक्ष्यसामग्रिविषये अनुवर्तिता।

उक्तञ्च मनुस्मृतौ-

" शुद्ध्येत् विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति। "[९]

जननकालेऽपि आशौचविधिः आस्ति। यद्वस्तु जननमरणपूर्वकाले दानभावेन सङ्कल्पितः तस्य अशुद्धिः न संभवति। मरणादतिरिक्ततया जननाशौचस्य लघिमा भवति। उक्तञ्च-

"विवाहोत्सवयज्ञादिष्वन्तरामृतसूतके
शेषमन्नं परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् ।।" [१०]

अस्पृश्यत्वम्, कर्मानर्हत्वम्, अधिकारित्वम् इत्यादयः विस्तरेण परिशोद्धव्याः एतस्मिन् विषये।

पर्युषितदोषः

जलसम्पर्केण पच्यमानविभवाः रात्रिवेलातिक्रमणे पर्युषिताः भवन्ति। पर्युषितभक्षणस्य तामसत्वं भगवद्गीतायामुक्तम्। यथा

"यातयामं गतरसं पूति पर्युषितं च तत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् " ।। [११]

पर्युषितानां भोज्यवस्तूनां अशुद्धत्वात् हानकारकत्वमस्ति अतः सर्वथा त्याज्यम् इत्याशयः । उक्तञ्च -

"शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च। " [१२]

तत्र अगर्हितत्वविधिरप्यस्ति-

"हविश्शेषं स्नेहाक्तं चिरसंस्थितं पर्युषितमपि अन्नं भोज्यम् " [१३]

भोक्तव्यम् न तु त्याज्यमित्यर्थः। उक्तञ्च मनुस्मृतौ -

" यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्।
तत्पर्युषितमप्याद्यं हविश्शेषं तु यद् भवेत्।।" [१४]

तद्विवरणे कुल्लूकभट्टः एवं अभिप्रेति -

मयूरमाषसंयुक्तं तथा पर्युषितं च यत्
तत्तु प्रक्षालितं कृत्वा भुञ्जीत . इति।

अन्नस्य दैवप्रतीकस्य कदापि हेलनं न कुर्यात् इति मत्वा एव निर्देशोऽयमित्यवगन्तव्यम्।

शुक्तदोषः

शुक्तं यत् मधुरं कालवशादम्लतां गतम् इति प्रायश्चित्तविवेके शुक्तभोज्यस्य स्वरूपं प्रदर्शितम्। यत् स्वयं अनम्लं कालवशेन द्रव्यान्तरसंसर्गकालपरिवासाभ्यां वा अम्लीभवति तत् शुक्तम् इत्यर्थः। शुक्तानां भोज्यवस्तूनां निषेधः सर्वथा कर्तव्यः । तत्रापि केषाञ्चन विशेषनिर्देशः दृश्यते। यथा मनुस्मृतौ -

"दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम्। (५-१०)
यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः।। " [१५]

दध्याश्रितानाम् मदकारिणाम् अरिष्टादीनां गुडनिर्मितानां मृण्मयादिशुचिपात्रपच्यानां भोज्यानां न निषेधः।

उपसंहारः

आरोग्ययुतस्यैव कर्मानुष्ठानविधिः। तदारोग्यं कथं समार्जनीयमित्यस्मिन् विषये आयुर्वेदशास्त्रे पदार्थानां स्वरूपस्वभावसंस्कारादयः निर्दिष्टाः भवन्ति। तद्वत् आचारप्रमुखेषु स्मृतिषु आरोग्यसम्पादनाय भक्ष्याभक्ष्यविवेकः समर्थितः। प्रायश्चित्तेन्दुशेखरे कालादिषड्दोषाः आहारस्य प्रतिपादिताः। तत्र कालदोषस्य विज्ञानेन पदार्थानां सम्यग्ज्ञानेन देहस्य तथा मनसश्च शुद्धिः आर्जनीया। आरोग्यम् तावत् शरीरेन्द्रियसत्त्वात्मसंयोगजन्यम् इत्यतः, 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति न्यायेन च भक्ष्याभक्ष्यविषये महती श्रद्धा विधेया ।

ग्रन्थसूची

१. कालविवेकः, जीमूतवाहनः, पृ. १८ ।
२. यमस्मृतिः, श्लोकसंख्या - ७६ ।
३. कालविवेकः, जीमूतवाहनः, पृ. ७८ ।
४. आयुर्वेदचन्द्रिका , डॉ . जयकृष्णन् (पृ.१६)।
५. धर्मसिन्धुः पृ. ४४ ।
६. वाल्मीकिरामायणम् - किष्किन्धाकाण्डम् - अध्यायः २४-२७ ।
७. निर्णयसिन्धुः, पृ. ३६८ ।
८. कृत्यकौमुदी, बृहस्पती, पृ. २६४ ।
९. मनुस्मृतिः ५ / ८३ ।
१०. कृत्यकौमुदी पृ. २७६ ।
११. भगवद्गीता १७/१० ।
१२. मनुस्मृति : ४/२११ ।
१३. याज्ञवल्क्यस्मृतिः १ / ७ / १६९ ।
१४. मनुस्मृति : ४ / २४ ।
१५. मनुस्मृतिः ४ / १०।